# Pratahsmarana Shlokas

# प्रातःस्मरणश्लोकानि

## Document Information

Text title : Pratahsmarana Shlokas

File name : prAtaHsmaraNashlokAni.itx

Category : misc, suprabhAta, suprabhAta

Location : doc_z_misc_misc

Proofread by : PSA Easwaran

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# प्रातःस्मरणश्लोकानि

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले भवे गौरी प्रभाते करदर्शनम् ॥ १॥

समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ २॥

ब्रह्मा मुरारिस्त्रिपुरान्तको वा
भानुश्शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रश्शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ३॥

सनत्कुमारस्सनकस्सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्तस्वरास्सप्तरसातलानि
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ४॥

सप्तार्णवास्सप्तकुलाचलाश्च
सप्तर्षयो द्वीपवनानि सप्त ।
भूरादिकृत्वा भुवनानि सप्त
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५॥

पृथ्वी सगन्धा सरसास्तथाऽऽपः
स्पर्शी च वायुर्ज्वलनः स तेजाः ।
नभस्सशब्दं महता सहैव
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ६॥

महेन्द्रो मलयस्सह्यो देवताऽऽत्मा हिमालयः ।
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ॥ ७॥

गङ्गा सिन्धुश्च कावेरी यमुना च सरस्वती ।

रेवा महानदी गोदा ब्रह्मपुत्रा पुनातु माम् ॥ ८॥

अयोध्या मधुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव संस्मृता मोक्षदायिकाः ॥ ९॥

प्रयागं पाटलीपुत्रं विजयीनगरं पुरीम् ।
इन्द्रप्रस्थं गयां चैव प्रत्यूषे प्रत्यहं स्मरेत् ॥ १०॥

अरुन्धत्यनसूया च सावित्री जानकी सती ।
तेजस्विनी च पाञ्चाली वन्दनीया निरन्तरम् ॥ ११॥

लक्ष्मीरहल्या चन्नम्मा मीरा दुर्गावती तथा ।
कण्णगी च महासाध्वी शारदा च निवेदिता ॥ १२॥

वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च ।
रामं च वै यः स्मरति प्रभाते तस्यार्थलाभो विजयश्च हस्ते ॥ १३॥

दध्यङ् मनुर्भृगुरसौ हरिपूर्वचन्द्रो
भीष्मार्जुनध्रुववसिष्ठशुकादयश्च ।
प्रह्लादनारदभगीरथविश्वकर्मा
वाल्मीकयोऽत्र चिरचिन्त्यशुभाभिधानाः ॥ १४॥

अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीवनः ॥ १५॥

सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ १६॥

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोको विदेहश्च पुण्यश्लोको जनार्दनः ॥ १७॥

बुद्धो जिनेन्द्रो गोरक्षः शङ्करश्च पतञ्जलिः ।
रामानुजोऽथ चैतन्यः कबीरो गुरुनानकः ॥ १८॥

ज्ञानेश्वरस्तुकारामः समरो मध्यवल्लभः ।
सरसिस्तुलसीदासः कम्बः साधुकुलोत्तमाः ॥ १९॥

नायनारालवाराश्च तिरुवल्लुवरस्तथा ।
वितरन्तु सदैवेते दैवीं मे गुणसम्पदम् ॥ २०॥

अगस्त्यः कम्बुकौण्डिन्यो राजेन्द्रश्चोलभूषणः ।

सर्वे दिग्जयिनः ख्याताः शैलेन्द्रो बप्परावलः ॥ २१॥

चाणक्यश्चन्द्रगुप्तश्च विक्रमश्शालिवाहनः ।
अशोकः पुष्यमित्रश्च खारवेलः सुनीतिमान् ॥ २२॥

हूणजेता यशोवर्मः समुद्रो गुप्तवंशजः ।
श्रीकृष्णदेवरायश्च प्रदाता हर्षवर्धनः ॥ २३॥

साधुश्शङ्करदेवश्च तथा सायणमाधवौ ।
प्रतापश्शिवराजश्च । गोविन्दो बसवेश्वरः । २४॥

रामकृष्णो दयानन्दो रवीद्रो राममोहनः ।
रामतीर्थोऽरविन्दश्च विवेकानन्द उद्यशाः ॥ २५॥

तिलको रमणश्चैव सुधीर्नारायणो गुरुः ।
महामना मालवीयो महात्मागान्धिरेव च ॥ २६॥

अनुक्ता ये भक्ता हरिचरणसंसक्तहृदया
    अविज्ञाता वीरा अधिसमरमुद्धस्तरिपवः ।
महात्मानस्सन्तो भरतभुवि ये सन्ति च परे
    नमस्तेभ्यो भूयादुषसि सकलेभ्यः प्रतिदिनम् ॥ २७॥

रत्नाकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ॥ २८॥

प्रातःस्मरणमेतद्यो विदित्वाऽऽदरतः पठेत् ।
स सम्यग्धर्मनिष्ठः स्यात्संस्मृताखण्डभारतः ॥ २९॥

इति प्रातःस्मरणश्लोकानि समाप्ता ।

Proofread by PSA Easwaran

*Pratahsmarana Shlokas*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*